अथ शिवकवचम् ॥

श्रीगणेशाय नमः ॥ अस्य श्रीशिवकवचस्तोत्रम-
न्त्रस्य ब्रह्मा ऋषिः । अनुष्टुप् छंदः । श्रीसदाशिव-
रुद्रो देवता । ह्रीं शक्तिः । रं कीलकम् । श्रीं ह्रीं क्लीं
बीजम् । श्रीसदाशिवप्रीत्यर्थे शिवकवचस्तोत्रजपे
विनियोगः । अथ न्यासः । ॐनमो भगवते ज्वल-
ज्वालामालिने ॐह्रां सर्वशक्तिधाम्ने ईशानात्मने
अंगुष्ठाभ्यां नमः । ॐनमो भगवते ज्वलज्वा
लामालिने ॐनं रिं नित्यतृप्तिधाम्ने तत्पुरुषा-
त्मने तर्जनीभ्यां नमः । ॐनमो भगवते ज्वलज्वा-
लामालिने ॐमं रुं अनादिशक्तिधाम्ने अघोरात्मने

मध्यमाभ्यां नमः । ॐनमो भगवते ज्वलज्वालामा
लिने ॐशिं रैं स्वतंत्रशक्तिधाम्ने वामदेवात्मने अ-
नामिकाभ्यां नमः । ॐनमो भगवते ज्वलज्वालामा-
लिने ॐवां रौं अलुप्तशक्तिधाम्ने सद्योजतात्मने क-
निष्ठिकाभ्यां नमः । ॐनमो भगवते ज्वलज्वालामा-
लिने ॐयं रः अनादिशक्तिधाम्ने सर्वात्मने करतल-
करपृष्ठाभ्यां नमः । एवं हृदयादि । अथ ध्यानम् ।
वज्रदंष्ट्रं त्रिनयनं कालकंठमरिंदमम् । सहस्रकरम-
त्युग्रं वंदे शंभुमुमापतिम् ॥ १ ॥ अथापरं सर्वपुरा-
णगुह्यं निःशेषपापौघहरं पवित्रम् । जयप्रदं सर्व-

विपत्प्रमोचनं वक्ष्यामि शैवं कवचं हिताय ते ॥२॥
ऋषभ उवाच । नमस्कृत्वा महादेवं विश्वव्यापिनमी-
श्वरम् । वक्ष्ये शिवमयं वर्म सर्वरक्षाकरं नृणाम्
॥३॥ शुचौ देशे समासीनो यथावत्कल्पितासनः ।
जितेंद्रियो जितप्राणश्चिन्तयेच्छिवमव्ययम् ॥ ४ ॥
हृत्पुण्डरीकांतरसन्निविष्टं स्वतेजसा व्याप्तनभोवका-
शम् । अतींद्रियं सूक्ष्ममनंतमाद्यं ध्यायेत्परानंदमयं
महेशम् ॥ ५ ॥ ध्यानावधूताखिलकर्मबंधश्चिरंचि-
दानंदनिमग्नचेताः । षडक्षरन्याससमाहितात्मा शै-
वेन कुर्यात्कवचेन रक्षाम् ॥६॥ मां पातु देवोऽखिल-

देवतात्मा संसारकूपे पतितं गभीरे । तन्नाम दिव्यं
वरमंत्रमूलं धुनोतु मे सर्वमघं हृदिस्थम् ॥७॥ सर्वत्र
मा रक्षतु विश्वमूर्तिर्ज्योतिर्मयानंदघनश्चिदात्मा ।
अणोरणीयानुरुशक्तिरेकः स ईश्वरः पातु भयादशे-
षात् ॥ ८ ॥ यो भूस्वरूपेण बिभर्ति विश्वं पायात्स
भूमेर्गिरिशोऽष्टमूर्तिः । योऽपां स्वरूपेण नृणां करो-
ति संजीवनं सोऽवतु मां जलेभ्यः ॥ ९ ॥ कल्पाव-
साने भुवनानि दग्ध्वा सर्वाणि यो नृत्यति भूरिली-
लः । स कालरुद्रोऽवतु मां दवाग्नेर्वात्यादिभीतेरखि-
लाच्च तापात् ॥१०॥ प्रदीप्तविद्युत्कनकावभासो वि-

द्यावराभीतिकुठारपाणिः । चतुर्मुखस्तत्पुरुषस्त्रिनेत्रः
प्राच्यां स्थितं रक्षतु मामजस्रम् ॥११॥ कुठारवेदां-
कुशपाशशूलकपालढक्काक्षगुणान्दधानः । चतुर्मुखो
नीलरुचिस्त्रिनेत्रः पायादघोरो दिशि दक्षिणस्याम्
॥१२॥ कुंदेंदुशंखस्फटिकावभासो वेदाक्षमालावर-
दाभयांकः । त्र्यक्षश्चतुर्वक्त्र उरुप्रभावः सद्योधिजा-
तोऽवतु मां प्रतीच्याम् ॥ १३ ॥ वराक्षमालाभयटं-
कहस्तः सरोजकिंजल्कसमानवर्णः ॥ त्रिलोचनश्चा-
रुचतुर्मुखो मां पायादुदीच्यां दिशि वामदेवः॥१४॥
वेदाभयेष्टांकुशपाशटंककपालढक्काक्षकशूलपाणिः ।

शिव सितद्युतिः पंचमुखोऽवतान्मामीशान ऊर्ध्वे परम- कव.
॥३॥ प्रकाशः ॥ १५ ॥ मूर्धानमव्यान्मम चंद्रमौलिर्भालं
ममाव्यादथ भालनेत्रः । नेत्रे ममाव्याद्भगनेत्रहारी
नासां सदा रक्षतु विश्वनाथः ॥ १६ ॥ पायाच्छ्रुती
मे श्रुतिगीतकीर्तिः कपोलमव्यात्सततं कपाली ।
वक्त्रं सदा रक्षतु पंचवक्त्रो जिह्वां सदा रक्षतु वेद-
जिह्वः ॥ १७ ॥ कंठं गिरीशोऽवतु नीलकंठः पाणि-
द्वयं पातु पिनाकपाणिः । दोर्मूलमव्यान्मम धर्मबा-
हुर्वक्षस्थलं दक्षमखांतकोऽव्यात् ॥ १८ ॥ ममोदरं ॥३॥
पातु गिरींद्रधन्वा मध्यं ममाव्यान्मदनांतकारी ।

हेरंबतातो मम पातु नाभिं पायात्कटिं धूर्जटिरीश्वरो
मे ॥ १९ ॥ ऊरुद्वयं पातु कुबेरमित्रो जानुद्वयं मे
जगदीश्वरोऽव्यात् । जंघायुगं पुंगवकेतुरव्यात्पादौ
ममाव्यात्सुरवंद्यपादः ॥२०॥ महेश्वरः पातु दिना-
दियामे मां मध्ययामेऽवतु वामदेवः । त्रिलोचनः
पातु तृतीययामे वृषध्वजः पातु दिनांत्ययामे॥२१॥
पायान्निशादौ शशिशेखरो मां गंगाधरो रक्षतु मां
निशीथे । गौरीपतिः पातु निशावसाने मृत्युंजयो
रक्षतु सर्वकालम् ॥ २२ ॥ अंतःस्थितं रक्षतु शंकरो
मां स्थाणुः सदा पातु बहिःस्थितं माम् । तदंतरे

 पातु पतिः पशूनां सदाशिवो रक्षतु मां समंतात्
॥२३॥तिष्ठंतमव्याद्भुवनैकनाथः पायाद्व्रजंतं प्रमथा-
धिनाथः । वेदांतवेद्योऽवतु मां निषण्णं मामव्ययः
पातु शिवः शयानम् ॥ २४ ॥ मार्गेषु मां रक्षतु नी-
लकंठः शैलादिदुर्गेषु पुरत्रयारिः । अरण्यवासादि-
महाप्रवासे पायान्मृगव्याध उदारशक्तिः ॥ २५ ॥
कल्पांतकाटोपपटुप्रकोपस्फुटाट्टहासोच्चलिताण्डको-
शः । घोरारिसेनार्णवदुर्निवारमहाभयाद्रक्षतु वीरभ-
द्रः॥२६॥ पत्त्यश्वमातंगरथावरूथसहस्रलक्षायुतको-
टिभीषणम् । अक्षौहिणीनां शतमाततायिनां छिंद्या-

न्मृडो घोरकुठारधारया ॥ २७॥ निहंतु दस्यून्प्रल-
यानलार्चिर्ज्वलत्त्रिशूलं त्रिपुरांतकस्य । शार्दूलसिंह-
र्क्षवृकादिहिंस्रान्संत्रासयत्वीशधनुः पिनाकः ॥२८॥
दुःस्वप्नदुःशकुनदुर्गतिदौर्मनस्यदुर्भिक्षदुर्व्यसनदुः-
सहदुर्यशांसि । उत्पाततापविषभीतिमसद्ग्रहार्तिं
व्याधींश्च नाशयतु मे जगतामधीशः ॥२९॥ ॐनमो
भगवते सदाशिवाय सकलतत्त्वात्मकाय सर्वमंत्रस्व-
रूपाय सर्वयंत्राधिष्ठिताय सर्वतंत्रस्वरूपाय सर्वत-
त्त्वविदूराय ब्रह्मरुद्रावतारिणे नीलकंठाय पार्वतीम-
नोहरप्रियाय सोमसूर्याग्निलोचनाय भस्मोद्धूलित-

विग्रहाय महामणिमुकुटधारणाय माणिक्यभूषणा-
य सृष्टिस्थितिप्रलयकालरौद्रावताराय दक्षाध्वरध्वंस-
काय महाकालभेदनाय मूलाधारैकनिलयाय तत्त्वा-
तीताय गंगाधराय सर्वदेवाधिदेवाय षडाश्रयाय स-
कलवेदांतसाराय त्रिवर्गसाधनायानंतकोटिब्रह्मांड-
नायकायानंतवासुकितक्षककर्कोटकशंखकुलिकपद्म-
महापद्मेत्यष्टमहानागकुलभूषणाय प्रणवस्वरूपाय
चिदाकाशायाकाशदिक्स्वरूपाय ग्रहनक्षत्रमालिने ॥५॥
सकलाय कलंकरहिताय सकललोकैककर्त्रे सकल
लोकैकभर्त्रे सकललोकैकसंहर्त्रे सकललोकैकगुरवे

सकललोकैकसाक्षिणे सकलनिगमगुह्याय सकलवे-
दांतपारगाय सकललोकैकवरप्रदाय सकललोकैक-
शंकराय शशांकशेखराय शाश्वतनिजावासाय नि-
राभासाय निरामयाय निर्मलाय निर्लोभाय निर्म-
दाय निश्चिंताय निरहंकाराय निरंकुशाय निष्कलं-
काय निर्गुणाय निष्कामाय निरुपप्लवाय निरवद्याय
निरंतराय निष्कारणाय निरातंकाय निष्प्रपंचाय
निःसंगाय निर्द्वंद्वाय निराधाराय नीरागाय निष्क्रो-
धाय निर्मलाय निष्पापाय निर्भयाय निर्विकल्पाय
निर्भेदाय निष्क्रियाय निस्तुलाय निःसंशयाय निरं-

जनाय निरुपमविभवाय नित्यशुद्धबुद्धपरिपूर्णस-
च्चिदानंदाद्वयाय परमशांतस्वरूपाय तेजोरूपाय
तेजोमयाय जय जयरुद्र महारौद्र भद्रावतार महाभै-
रव कालभैरव कल्पांतभैरव कपालमालाधर खट्वांग-
खड्गचर्मपाशांकुशडमरुशूलचापबाणगदाशक्तिभिं-
डिपालतोमरमुसलमुद्गरपाशपरिघभुशुंडीशतघ्नी-
चक्राद्यायुधभीषणकर सहस्रमुख दंष्ट्राकरालवदन
विकटाट्टहासविस्फारितब्रह्मांडमंडल नागेन्द्रकुंडल
नागेंद्रहार नागेंद्रवलय नागेंद्रचर्मधर मृत्युंजय त्र्यं-
बक त्रिपुरांतक विश्वरूप विरूपाक्ष विश्वेश्वर वृषभ-

वाहन विश्वतोमुख सर्वतो रक्ष रक्ष मा ज्वल ज्वल
महामृत्युमपमृत्युभयं नाशय नाशय चोरभयमुत्सा-
दयोत्सादय विषसर्पभयं शमय शमय चोरान्मारय
मारय मम शत्रूनुच्चाटयोच्चाटय त्रिशूलेन विदारय
विदारय कुठारेण भिंधि भिंधि खड्गेन छिंधि छिंधि
खट्वांगेन विपोथय विपोथय मुसलेन निष्पेषय नि-
ष्पेषय बाणैः संताडय संताडय रक्षांसि भीषय भीष-
याशेषभूतानि विद्रावय विद्रावय कूष्मांडवेतालमा-
रीगणब्रह्मराक्षसगणान् संत्रासय संत्रासय ममाभयं
कुरु कुरु वित्रस्तं मामाश्वासयाश्वासय नरकमहाभ-

यान्मामुद्धरोद्धर संजीवय संजीवय क्षुत्तृड्भ्या मामा-
प्याययाप्यायय दुःखातुरं मामानंदयानंदय शिवक-
वचेन मामाच्छादयाच्छादय मृत्युंजय त्र्यंबक सदा-
शिव नमस्ते नमस्ते । ऋषभ उवाच । इत्येतत्कवचं
शैवं वरदं व्याहृतं मया । सर्वबाधाप्रशमनं रहस्यं स-
र्वदेहिनाम् ॥३०॥ यः सदा धारयेन्मर्त्यः शैवं कवच-
मुत्तमम् । न तस्य जायते क्वापि भयं शंभोरनुग्रहा-
त्॥३१॥ क्षीणायुः प्राप्तमृत्युर्वा महारोगहतोऽपि वा ।
सद्यः सुखमवाप्नोति दीर्घमायुश्च विंदति ॥३२॥ सर्व-
दारिद्र्यशमनं सौमंगल्यविवर्धनम् । यो धत्ते कवचं

शैवं स देवैरपि पूज्यते ॥ ३३ ॥ महापातकसंघातै-
र्मुच्यते चोपपातकैः । देहांते मुक्तिमाप्नोति शिव-
वर्मानुभावतः ॥ ३४ ॥ त्वमपि श्रद्धया वत्स शैवं
कवचमुत्तमम् । धारयस्व मया दत्तं सद्यः श्रेयो ह्य-
वाप्स्यसि ॥ ३५ ॥ सूत उवाच । इत्युक्त्वा ऋषभो
योगी तस्मै पार्थिवसूनवे । ददौ शंखं महारावं खड्गं
चारिनिषूदनम्॥३६॥ पुनश्च भस्म संमंत्र्य तदंगं प-
रितोऽस्पृशत् । गजानां षट्सहस्रस्य द्विगुणस्य बलं
ददौ ॥ ३७ ॥ भस्मप्रभावात्संप्राप्तबलैश्वर्यधृतिस्मृ-
तिः । स राजपुत्रः शुशुभे शरदर्क इव श्रिया॥३८॥

तमाह प्रांजलिं भूयः स योगी नृपनंदनम् । एष खड्गो मया दत्तस्तपोमंत्रानुभावितः ॥ ३९ ॥ शितधारमिमं खड्गं यस्मै दर्शयसे स्फुटम् । स सद्यो म्रियते शत्रुः साक्षान्मृत्युरपि स्वयम् ॥ ४० ॥ अस्य शंखस्य निर्ह्रादं ये शृण्वंति तवाहिताः । ते मूर्च्छिताः पतिष्यंति न्यस्तशस्त्रा विचेतनाः ॥ ४१ ॥ खड्गशंखाविमौ दिव्यौ परसैन्यविनाशनौ । आत्मसैन्यस्वपक्षाणां शौर्यतेजोविवर्धनौ ॥ ४२ ॥ एतयोश्च प्रभावेण शैवेन कवचेन च । द्विषट्सहस्रनागानां बलेन महतापि च ॥ ४३ ॥ भस्मधारणसामर्थ्याच्छत्रुसैन्यं विजेष्यसि । प्राप्य सिंहासनं पित्र्यं गोप्तासि पृथिवीमिमाम् ॥ ४४ ॥ इति भद्रायुषं सम्यगनुशास्य समातृकम् । ताभ्यां संपूजितः सोऽथ योगी स्वैरगतिर्ययौ ॥ ४५ ॥ इति श्रीस्कंदपुराणे ब्रह्मोत्तरखंडे शिवकवचं समाप्तम् ॥

इदं पुस्तकं "निर्णयसागरा" ख्यमुद्रणालये तदधिपतिना 'तुकाराम जावजी' इत्यनेन मुद्रितं प्राकाश्यं नीतं च ॥

शके १८३६, सन १९१४.

PUBLISHER:—Tukaram Javaji, PRINTER:—R. Y. Shedge, the "Nirnaya-sagar" Press, 23 Kolbhat Lane, Bombay.

इति विंध्यकवचम् ॥